# Shri Shashthi Devi Stotram

# શ્રીષષ્ઠીદેવિ સ્તોત્રમ્

## Document Information

Text title : ShaShThIdevIstotram

File name : ShaShThIdevIstotram.itx

Category : devii, otherforms, devI

Location : doc_devii

Description-comments : brahmavaiartapurANa, prakRitikhaNDa, adhyAya 43, 57-71

Latest update : August 28, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 22, 2022

*sanskritdocuments.org*

Shri Shashthi Devi Stotram

# શ્રીષષ્ઠીદેવિ સ્તોત્રમ્

શ્રી ગણેશાય નમઃ ॥

ધ્યાનમ્ ।
શ્રીમન્માતરમમ્બિકાં વિધિ મનોજાતાં સદાભીષ્ટદાં
સ્કન્દેષ્ટાં ચ જગત્પ્રસૂં વિજયદાં સત્પુત્ર સૌભાગ્યદામ્ ।
સદ્રત્નાભરણાન્વિતાં સકરુણાં શુભ્રાં શુભાં સુપ્રભાં
ષષ્ઠાંશાં પ્રકૃતેઃ પરાં ભગવતીં શ્રીદેવસેનાં ભજે ॥

ષષ્ઠાંશાં પ્રકૃતેઃ શુદ્ધાં સુપ્રતિષ્ઠાં ચ સુવ્રતામ્ ।
સુપુત્રદાં ચ શુભદાં દયારૂપાં જગત્પ્રસૂમ્ ॥

શ્વેતચમ્પક વર્ણાભાં રક્તભૂષણ ભૂષિતામ્ ।
પવિત્રરૂપાં પરમાં દેવસેનાં પરામ્ભજે ॥

અથ શ્રીષષ્ઠીદેવિ સ્તોત્રમ્ ।
સ્તોત્રં શ‍ૃણુ મુનિશ્રેષ્ઠ સર્વકામશુભાવહમ્ ।
વાઞ્છાપ્રદં ચ સર્વેષાં ગૂઢં વેદે ચ નારદ ॥

પ્રિયવ્રત ઉવાચ ।
નમો દેવ્યૈ મહાદેવ્યૈ સિદ્ધ્યૈ શાન્ત્યૈ નમો નમઃ ।
શુભાયૈ દેવસેનાયૈ ષષ્ઠીદેવ્યૈ નમો નમઃ ॥ ૧॥

વરદાયૈ પુત્રદાયૈ ધનદાયૈ નમો નમઃ ।
સુખદાયૈ મોક્ષદાયૈ ચ ષષ્ઠીદેવ્યૈ નમો નમઃ ॥ ૨॥

સૃષ્ટ્યૈ ષષ્ઠાંશરૂપાયૈ સિદ્ધાયૈ ચ નમો નમઃ । var શક્તિષષ્ઠીસ્વરૂપાયૈ
માયાયૈ સિદ્ધયોગિન્યૈ ષષ્ઠીદેવ્યૈ નમો નમઃ ॥ ૩॥

પરાયૈ પારદાયૈ ચ ષષ્ઠીદેવ્યૈ નમો નમઃ ।
સારાયૈ સારદાયૈ ચ પરાયૈ સર્વકર્મણામ્ ॥ ૪॥

બાલાધિષ્ઠાતૃદેવ્યૈ ચ ષષ્ઠીદેવ્યૈ નમો નમઃ ।
કલ્યાણદાયૈ કલ્યાણ્યૈ ફલદાયૈ ચ કર્મણામ્ ॥ ૫॥

પ્રત્યક્ષાયૈ ચ ભક્તાનાં ષષ્ઠીદેવ્યૈ નમો નમઃ ।
પૂજ્યાયૈ સ્કન્દકાન્તાયૈ સર્વેષાં સર્વકર્મસુ ॥ ૬॥

દેવરક્ષણકારિણ્યૈ ષષ્ઠીદેવ્યૈ નમો નમઃ ।
શુદ્ધસત્ત્વસ્વરૂપાયૈ વન્દિતાયૈ નૃણાં સદા ॥ ૭॥

હિંસાક્રોધવર્જિતાયૈ ષષ્ઠીદેવ્યૈ નમો નમઃ ।
ધનં દેહિ પ્રિયાં દેહિ પુત્રં દેહિ સુરેશ્વરિ ॥ ૮॥

ધર્મં દેહિ યશો દેહિ ષષ્ઠીદેવ્યૈ નમો નમઃ ।
ભૂમિં દેહિ પ્રજાં દેહિ દેહિ વિદ્યાં સુપૂજિતે ॥ ૯॥

કલ્યાણં ચ જયં દેહિ ષષ્ઠીદેવ્યૈ નમો નમઃ ।
॥ ફલશ્રુતિ ॥

ઇતિ દેવીં ચ સંસ્તૂય લેભે પુત્રં પ્રિયવ્રતઃ ॥ ૧૦॥

યશસ્વિનં ચ રાજેન્દ્રં ષષ્ઠીદેવીપ્રસાદતઃ ।
ષષ્ઠીસ્તોત્રમિદં બ્રહ્મન્યઃ શ્રૃણોતિ ચ વત્સરમ્॥ ૧૧।
અપુત્રો લભતે પુત્રં વરં સુચિરજીવિનમ્ ।
વર્ષમેકં ચ યા ભક્ત્યા સંયત્તેદં શ્રૃણોતિ ચ ॥ ૧૨॥

સર્વપાપાદ્વિનિર્મુક્તા મહાવન્ધ્યા પ્રસૂયતે ।
વીરપુત્રં ચ ગુણિનં વિદ્યાવન્તં યશસ્વિનમ્ ॥ ૧૩॥

સુચિરાયુષ્મન્તમેવ ષષ્ઠીમાતૃપ્રસાદતઃ ।
કાકવન્ધ્યા ચ યા નારી મૃતાપત્યા ચ યા ભવેત્ ॥ ૧૪॥

વર્ષં શ્રૃત્વા લભેત્પુત્રં ષષ્ઠીદેવીપ્રસાદતઃ ।
રોગયુક્તે ચ બાલે ચ પિતા માતા શ્રૃણોતિ ચેત્ ॥ ૧૫॥

માસં ચ મુચ્યતે બાલઃ ષષ્ઠીદેવી પ્રસાદતઃ ।

॥ ઇતિ શ્રીબ્રહ્મવૈવર્તે મહાપુરાણે ઇતિખણ્ડે નારદનારાયણસંવાદે
ષષ્ઠ્યુપાખ્યાને શ્રીષષ્ઠીદેવિસ્તોત્રં સમ્પૂર્ણમ્ ॥

દેવીભાગવતપુરાણે નવમસ્કન્ધે અધ્યાય ૪૬ (૫૮-)

brahmavaiartapurANa, prakRitikhaNDa, adhyAya 43, shloka 57-71
Encoded and proofread by Jonathan Wiener wiener78 at sbcglobal.net, NA

*Shri Shashthi Devi Stotram*

pdf was typeset on January 22, 2022

Please send corrections to *sanskrit@cheerful.com*